# 10 - अथ दशम दशकम्
## ॥ सृष्टिभेदवर्णनं ॥

वैकुंठ! वर्धितबलोऽथ भवत्प्रसादात्
अंभोजयोनिरसृजत् किल जीवदेहान् ।
स्थास्नूनि भूरुहमयानि तथा तिरश्चां
जातीर्मनुष्यनिवहानपि देवभेदान् ॥ (10.1)

मिथ्याग्रहास्मि मतिरागविकोपभीतिः
अज्ञानवृत्तिमिति पंचविधां स सृष्ट्वा ।
उद्दामतामसपदार्थविधानदूनः
तेने त्वदीयचरणस्मरणं विशुद्ध्यै ॥ (10.2)

तावत् ससर्ज मनसा सनकं सनंदं
भूयस्सनातनमुनिं च सनत्कुमारम् ।
ते सृष्टिकर्मणि तु तेन नियुज्यमानाः
त्वत्पादभक्तिरसिका जगृहुर्न वाणीम् ॥ (10.3)

तावत् प्रकोपमुदितं प्रतिरुंधतोऽस्य
भ्रूमध्यतोऽजनि मृडो भवदेकदेशः ।
नामानि मे कुरु पदानि च हा विरिंचे-
त्यादौ रुरोद किल तेन स रुद्रनामा ॥ (10.4)

एकादशाह्वयतया च विभिन्नरूपं
रुद्रं विधाय दयिता वनिताश्च दत्त्वा ।
तावंत्यदत्त च पदानि भवत्प्रणुन्नः
प्राह प्रजाविरचनाय च सादरं तम् ॥ (10.5)

रुद्राभिसृष्टभयदाकृतिरुद्र संघ-
संपूर्यमाणभुवनत्रयभीतचेताः ।
मा मा प्रजाः सृज तपश्चर मंगलायॆ-
त्याचष्ट तं कमलभूर्भवदीरितात्मा ॥ (10.6)

तस्याथ सर्गरसिकस्य मरीचिरत्रिः
तत्रांगिराः क्रतुमुनिः पुलहः पुलस्त्यः ।
अंगदजायत भृगुश्च वसिष्ठदक्षौ
श्रीनारदश्च भगवन् भवदंघ्रिदासः ॥ (10.7)

धर्मादिकानभिसृजन्नथ कर्दमं च
वाणीं विधाय विधिरंगजसंकुलोऽभूत् ।
त्वद्बोधितैस्सनकदक्षमुखैस्तनूजैः
उद्बोधितश्च विरराम तमो विमुंचन् ॥ (10.8)

वेदान् पुराणनिवहानपि सर्वविद्याः
कुर्वन् निजाननगणाच्चतुराननोऽसौ ।
पुत्रेषु तेषु विनिधाय स सर्गवृद्धिम्
अप्राप्नुवंस्तव पदांबुजमाश्रितोऽभूत् ॥ (10.9)

जानन्नुपायमथ देहमजो विभज्य-
स्त्रीपुंसभावमभजन्मनु तद्वधूभ्याम् ।
ताभ्यां च मानुषकुलानि विवर्धयंस्त्वं
गोविंद! मारुतपुराधिप! निरुंधि रोगान् ॥ (10.10)

॥ इति सृष्टिभेदवर्णनं दशम दशकम् संपूर्णम् ॥